# Shri Ganesha Stuti Yamakrita

# યમકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

```
Text title : Shri Ganesha Stuti Yamakrita
File name : gaNeshastutiHyamakRRitA.itx
Category : ganesha, mudgalapurANa, stuti, ekAdasha
Location : doc_ganesha
Proofread by : Yash Khasbage, Preeti Bhandare
Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 59 | 2.59. 22-45||
Latest update : June 4, 2024
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# યમકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
યમ ઉવાચ ।
નમો ગણપતે તુભ્યં નાનામાયાવિલાસિને ।
માયાધારકવેષેણ સ્થિતાય તુ નમો નમઃ ॥ ૨૨॥
માયામોહવિહીનાય સાક્ષિણે જગદાદયે ।
બ્રહ્માદયે બ્રહ્મવિદે બ્રહ્મણે વૈ નમો નમઃ ॥ ૨૩॥
અનન્તાય નમસ્તુભ્યં હેરમ્બાય ચ ઢુણ્ઢયે ।
વિઘ્નેશાય ત્રિનેત્રાય લમ્બોદર નમોઽસ્તુ તે ॥ ૨૪॥
ગજાનનાય દેવાય દેવાનાં પતયે નમઃ ।
દેવાનાં ગર્વહન્ત્રે ચ રક્ષસાં મર્દિને નમઃ ॥ ૨૫॥
ભક્તિપ્રિયાય ભક્તેભ્યો નાનાસૌખ્યપ્રદાય તે ।
અનન્તાનનધારાયાનન્તહસ્તાય તે નમઃ ॥ ૨૬॥
અનન્તશિરસે તુભ્યં બ્રહ્મભૂતાય વેધસે ।
શિવાય શિવવન્દ્યાય શિવદાય નમો નમઃ ॥ ૨૭॥
અખણ્ડવિભવાયૈવ મૂષકધ્વજિને નમઃ ।
મૂષકશ્રેષ્ઠવાહસ્થાયૈકદન્તાય તે નમઃ ॥ ૨૮॥
આદિમધ્યાન્તરૂપાય સર્વાકારાય તે નમઃ ।
પાશાઙ્કુશધરાયૈવ સર્વભોક્ત્રે નમો નમઃ ॥ ૨૯॥
ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદ્યોગાકારસ્વરૂપિણમ્ ।
અતોઽહં પ્રણમામીહ તેન તુષ્ટો ભવ પ્રભો ॥ ૩૦॥
ધન્યોઽહં સર્વભાવૈશ્ચ યેન દૃષ્ટો ગણેશ્વરઃ ।
અધુના રક્ષ માં ભક્તં શરણાગતવત્સલ ॥ ૩૧॥
એવં સ્તુવન્તમત્યન્તમુવાચ ગણનાયકઃ ।
યમં પરમભક્તં ચ સૂર્યપુત્રં યશસ્વિનમ્ ॥ ૩૨॥
(ફલશ્રુતિઃ)

ગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગ યમ ત્વં મનસીપ્સિતમ્ ।
દાસ્યામિ તે મહાભક્ત્યા તોષિતોઽહં ન સંશયઃ ॥ ૩૩॥
તતસ્તં ભાનુજસ્તત્રોવાચ દેહિ ગજાનન ।
ભક્તિં ત્વદીયપાદે વૈ સુદૃઢાં મે મહોદર ॥ ૩૪॥
અન્યં વરં ચ મે દેહિ માતૃશાપહરં પરમ્ ।
યદ્યદિચ્છામિ દેવેશ તત્તત્ સિધ્યતુ વિઘ્નપ ॥ ૩૫॥
એવં તસ્ય વચઃ શ્રુત્વા તથેતિ ગણપોઽબ્રવીત્ ।
મદીયા તે મહાભક્તિર્ભવિષ્યતિ ન સંશયઃ ॥ ૩૬॥
માતૃશાપસ્ય યોગેન કિઞ્ચિદ્ દુઃખમવાપ્સ્યસિ ।
ક્લેદ્યપાદાચ્ચ માંસં તે કીટાઃ સઙ્ગૃહ્ય સત્વરમ્ ॥ ૩૭॥
પતિષ્યન્તિ પૃથિવ્યાં તે ત્વં સુપાદો ભવિષ્યસિ ।
યદ્યદિચ્છસિ તત્તત્તે સુલભં પ્રભવિષ્યતિ ॥ ૩૮॥
દક્ષિણસ્યાં દિશિ પ્રાજ્ઞ દિક્પાલસ્ત્વં ભવિષ્યસિ ।
ધર્મરાજ ઇતિ ખ્યાતો નામ્ના સર્વત્ર પૂજિતઃ ॥ ૩૯॥
સ્વધર્મપાલકેષુ ત્વં શ્રેષ્ઠો ધર્મકરો મતઃ ।
જીવાનાં કર્મયોગેન ફલદશ્ચ ભવિષ્યસિ ॥ ૪૦॥
ત્વદીયાઽઽજ્ઞા ત્રિલોકેષુ વર્તતાં ધર્મભાવતઃ ।
ત્વયા સ્તોત્રમિદં પુણ્યં કૃતં તચ્ચ સુસિદ્ધિદમ્ ॥ ૪૧॥
પઠતે શ‍ૃણ્વતે પૂર્ણં ભવિષ્યતિ ન સંશયઃ ।
યમસ્ય યાતનાં ઘોરાં સ્તોત્રેણ પ્રસ્તુતો યમ ॥ ૪૨॥
હરામિ નાત્ર સન્દેહોંઽતે સ્વાનન્દં દદામ્યહમ્ ।
ત્વયા યત્ર કૃતં સ્નાનં નિત્યં મદ્ભક્તિભાવિના ॥ ૪૩॥
ગણેશતીર્થસંજ્ઞં તદ્ભવિષ્યતિ ન સંશયઃ ।
અત્રૈવ સ્નાનમાત્રેણ સર્વપાપક્ષયો ભવેત્ ॥ ૪૪॥
સુબુદ્ધિપ્રદમેતચ્ચ તત્ક્ષણાત્ પ્રભવિષ્યતિ ।
એવમુક્ત્વાન્તર્દધેઽસૌ યમસ્તત્ર સ્થિતોઽભવત્ ॥ ૪૫॥

ઇતિ યમકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥
એકાદશસ્તોત્રં

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૫૯ । ૨.૫૯। ૨૨-૪૫॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 59 . 2.59. 22-45..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Yamakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*